# Вагбхата. Аштанга-хридая-самхита.

*Глава 1, раздел 1.*

Перевод с санскрита. Перевод комментариев с английского яз.

Коллектив переводчиков.

रागादिरोगान् सततानुषक्तान् अशेषकायप्रसृतान् अशेषान् । (१.१)
औत्सुक्यमोहारतिदाञ् जघान यो ऽपूर्ववैद्याय नमो ऽस्तु तस्मै ॥ (१.२)

rāgādirogān satatānuṣaktān aśeṣakāyaprasṛtān aśeṣān / (1.1)
autsukyamohāratidāñ jaghāna yo 'pūrvavaidyāya namo 'stu tasmai // (1.2)

- राग rāga *m*,
- आदि ādi *m*,
- रोग roga *mn*,
- सतत satata *adj*,
- अनुषञ्ज् anuṣañj *1.Ā.*,
- अशेष aśeṣa *m*,
- काय kāya *m*,
- प्रसृ prasṛ *1.Ā.*,
- अशेष aśeṣa *m*,
- औत्सुक्य autsukya *n*,
- मोह moha *m*,
- अरति arati *adj*,
- द da *adj*,
- हन् han *m*,
- यद् yad *pron*,
- अपूर्व apūrva *adj*,
- वैद्य vaidya *adj*,
- नमस् namas *n*,
- अस् as *m*,
- तद् tad *m*,

Понос невозможно остановить.

आयुः कामयमानेन धर्मार्थसुखसाधनम् । (२.१)
आयुर्वेदोपदेशेषु विधेयः परम् आदरः ॥ (२.२)

āyuḥ kāmayamānena dharmārthasukhasādhanam / (2.1)
āyurvedopadeśeṣu vidheyaḥ param ādaraḥ // (2.2)

- आयुस् āyus *n*,
- कामय् kāmay *10.P.*,
- धर्म dharma *mn*,
- अर्थ artha *mn*,
- सुख sukha *adj*,
- साधन sādhana *n*,
- आयुर्वेद āyurveda *m*,
- उपदेश upadeśa *m*,
- विधा vidhā *f*,
- पर para *pron*,
- आदर ādara *m*,

ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिम् अजिग्रहत् । (३.१)
सो ऽश्विनौ तौ सहस्राक्षं सो ऽत्रिपुत्रादिकान् मुनीन् ॥ (३.२)
brahmā smṛtvāyuṣo vedaṃ prajāpatim ajigrahat / (3.1)
so 'śvinau tau sahasrākṣaṃ so 'triputrādikān munīn // (3.2)

ब्रह्मन् brahman *n*,
स्मृ smṛ *m*,
आयुस् āyus *n*,
वेद veda *m*,
प्रजापति prajāpati *m*,
ग्रह् grah *6.P.*,
तद् tad *m*,
अश्विन् aśvin *m*,
तद् tad *m*,
सहस्राक्ष sahasrākṣa *m*,
तद् tad *m*,
अत्रि atri *m*,
पुत्र putra *m*,
आदिक ādika *adj*,
मुनि muni *m*,

ते ऽग्निवेशादिकांस् ते तु पृथक् तन्त्राणि तेनिरे । (४.१)
तेभ्यो ऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः ॥ (४.२)
te 'gniveśādikāṃs te tu pṛthak tantrāṇi tenire / (4.1)
tebhyo 'tiviprakīrṇebhyaḥ prāyaḥ sārataroccayaḥ // (4.2)

तद् tad *m*,
अग्निवेश agniveśa *m*,
आदिक ādika *adj*,
तद् tad *m*,
तु tu *m*,
पृथक् pṛthak *ind*,
तन्त्र tantra *n*,
तन् tan *8.Ā.*,
तद् tad *m*,
अतिविप्रकीर्ण ativiprakīrṇa *adj*,
प्रायस् prāyas *ind*,
सारतर sāratara *adj*,
उच्चय uccaya *m*,

क्रियते ऽष्टाङ्गहृदयं नातिसंक्षेपविस्तरम् । (५.१)
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजरावृषान् ॥ (५.२)
kriyate 'ṣṭāṅgahṛdayaṃ nātisaṃkṣepavistaram / (5.1)
kāyabālagrahordhvāṅgaśalyadaṃṣṭrājarāvṛṣān // (5.2)

कृ kṛ *n*,
अष्टाङ्गहृदय aṣṭāṅgahṛdaya *n*,
न na *m*,
अति ati *m*,
काय kāya *m*,
बाल bāla *n*,
ग्रह graha *adj*,
ऊर्ध्वाङ्ग ūrdhvāṅga *n*,

संक्षेप saṃkṣepa *m*,
विस्तर vistara *adj*,
शल्य śalya *m*,
दंष्ट्र daṃṣṭra *mfn*,
जरा jarā *f*,
वृष vṛṣa *m*,

अष्टाव् अङ्गानि तस्याहुश् चिकित्सा येषु संश्रिता । (६.१)
वायुः पित्तं कफश् चेति त्रयो दोषाः समासतः ॥ (६.२)
aṣṭāv aṅgāni tasyāhuś cikitsā yeṣu saṃśritā / (6.1)
vāyuḥ pittaṃ kaphaś ceti trayo doṣāḥ samāsataḥ // (6.2)

अष्टन् aṣṭan *m*,
अङ्ग aṅga *adj*,
तद् tad *m*,
अह् ah *1.P.*,
चिकित्सा cikitsā *f*,
यद् yad *pron*,
संश्रि saṃśri *1.Ā.*,
वायु vāyu *m*,
पित्त pitta *n*,
कफ kapha *m*,
च ca *m*,
इति iti *m*,
त्रि tri *m*,
दोष doṣa *mn*,
समासतस् samāsatas *ind*,

विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च । (७.१)
ते व्यापिनो ऽपि हृन्नाभ्योर् अधोमध्योर्ध्वसंश्रयाः ॥ (७.२)
vikṛtāvikṛtā dehaṃ ghnanti te vartayanti ca / (7.1)
te vyāpino 'pi hṛnnābhyor adhomadhyordhvasaṃśrayāḥ // (7.2)

विकृ vikṛ *6.Ā.*,
अविकृत avikṛta *adj*,
देह deha *mn*,
हन् han *m*,
तद् tad *m*,
वर्तय् vartay *10.Ā.*,
च ca *m*,
तद् tad *m*,
व्यापिन् vyāpin *adj*,
अपि api *m*,
हृद् hṛd *n*,
नाभि nābhi *f*,
अधस् adhas *m*,
मध्य madhya *adj*,
ऊर्ध्व ūrdhva *m*,
संश्रय saṃśraya *m*,

वयोऽहोरात्रिभुक्तानां ते ऽन्तमध्यादिगाः क्रमात् । (८.१)
तैर् भवेद् विषमस् तीक्ष्णो मन्दश् चाग्निः समैः समः ॥ (८.२)
vayo'horātribhuktānāṃ te 'ntamadhyādigāḥ kramāt / (8.1)
tair bhaved viṣamas tīkṣṇo mandaś cāgniḥ samaiḥ samaḥ // (8.2)

वयस् vayas *n*,
अहर् ahar *n*,
रात्रि rātri *f*,
भुक्त bhukta *n*,
तद् tad *m*,
अन्त anta *m*,
मध्य madhya *adj*,
आदि ādi *m*,
ग ga *m*,
क्रमात् kramāt *ind*,
तद् tad *m*,
भू bhū *f*,
विषम viṣama *n*,
तीक्ष्ण tīkṣṇa *n*,
मन्द् manda *m*,
च ca *m*,
अग्नि agni *m*,
सम sama *adj*,
सम sama *adj*,

कोष्ठः क्रूरो मृदुर् मध्यो मध्यः स्यात् तैः समैर् अपि । (९.१)
शुक्रार्तवस्थैर् जन्मादौ विषेणेव विषक्रिमेः ॥ (९.२)
koṣṭhaḥ krūro mṛdur madhyo madhyaḥ syāt taiḥ samair api / (9.1)
śukrārtavasthair janmādau viṣeṇeva viṣakrimeḥ // (9.2)

कोष्ठ koṣṭha *mn*,
क्रूर krūra *m*,
मृदु mṛdu *n*,
मध्य madhya *adj*,
मध्य madhya *adj*,
अस् as *m*,
तद् tad *m*,
सम sama *adj*,
अपि api *m*,
शुक्र śukra *n*,
आर्तव ārtava *n*,
स्थ stha *adj*,
जन्मन् janman *n*,
आदि ādi *m*,
विष viṣa *adj*,
इव iva *ind*,
विष viṣa *adj*,
क्रिमि krimi *m*,

तैश् च तिस्रः प्रकृतयो हीनमध्योत्तमाः पृथक् । (१०.१)
समधातुः समस्तासु श्रेष्ठा निन्द्या द्विदोषजाः ॥ (१०.२)
taiś ca tisraḥ prakṛtayo hīnamadhyottamāḥ pṛthak / (10.1)
samadhātuḥ samastāsu śreṣṭhā nindyā dvidoṣajāḥ // (10.2)

तद् tad *m*,
च ca *m*,
त्रि tri *m*,
प्रकृति prakṛti *f*,
हा hā *f*,
मध्य madhya *adj*,
उत्तम uttama *m*,
सम sama *adj*,
धातु dhātu *mn*,
समस्त samasta *adj*,
श्रेष्ठ śreṣṭha *n*,
निन्द् nind *1.Ā.*,
द्वि dvi *nr*,
दोष doṣa *mn*,

पृथक् pṛthak *ind*, | ज ja *m*,

तत्र रूक्षो लघुः शीतः खरः सूक्ष्मश् चलो ऽनिलः । (११.१)
पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रं सरं द्रवम् ॥ (११.२)
tatra rūkṣo laghuḥ śītaḥ kharaḥ sūkṣmaś calo 'nilaḥ / (11.1)
pittaṃ sasnehatīkṣṇoṣṇaṃ laghu visraṃ saraṃ dravam // (11.2)

तत्र tatra *ind*,
रूक्ष rūkṣa *n*,
लघु laghu *n*,
शीत śīta *n*,
खर khara *n*,
सूक्ष्म sūkṣma *mn*,
चल cala *n*,
अनिल anila *m*,
पित्त pitta *n*,
स sa *m*,
स्नेह sneha *mn*,
तीक्ष्ण tīkṣṇa *n*,
उष्ण uṣṇa *adj*,
लघु laghu *n*,
विस्र visra *adj*,
सर sara *adj*,
द्रव drava *mn*,

स्निग्धः शीतो गुरुर् मन्दः श्लक्ष्णो मृत्स्नः स्थिरः कफः । (१२.१)
संसर्गः संनिपातश् च तद्द्वित्रिक्षयकोपतः ॥ (१२.२)
snigdhaḥ śīto gurur mandaḥ ślakṣṇo mṛtsnaḥ sthiraḥ kaphaḥ / (12.1)
saṃsargaḥ saṃnipātaś ca taddvitrikṣayakopataḥ // (12.2)

स्निग्ध snigdha *n*,
शीत śīta *n*,
गुरु guru *n*,
मन्द manda *m*,
श्लक्ष्ण ślakṣṇa *adj*,
मृत्स्न mṛtsna *adj*,
स्थिर sthira *m*,
कफ kapha *m*,
संसर्ग saṃsarga *m*,
संनिपात saṃnipāta *m*,
च ca *m*,
तद् tad *m*,
द्वि dvi *nr*,
त्रि tri *m*,
क्षय kṣaya *m*,
कोप kopa *m*,

रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः । (१३.१)
सप्त दूष्या मला मूत्रशकृत्स्वेदादयो ऽपि च ॥ (१३.२)
rasāsṛṅmāṃsamedo'sthimajjaśukrāṇi dhātavaḥ / (13.1)
sapta dūṣyā malā mūtraśakṛtsvedādayo 'pi ca // (13.2)

रस rasa *mn*,
असृज् asṛj *n*,
मांस māṃsa *n*,
सप्तन् saptan *adj*,
दूष्य dūṣya *m*,
मल mala *mn*,

मेदस् medas *n*,
अस्थि asthi *n*,
मज्जन् majjan *m*,
शुक्र śukra *n*,
धातु dhātu *mn*,
मूत्र mūtra *n*,
शकृत् śakṛt *n*,
स्वेद sveda *m*,
आदि ādi *m*,
अपि api *m*,
च ca *m*,

वृद्धिः समानैः सर्वेषां विपरीतैर् विपर्ययः । (१४.१)
रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ॥ (१४.२)
vṛddhiḥ samānaiḥ sarveṣāṃ viparītair viparyayaḥ / (14.1)
rasāḥ svādvamlalavaṇatiktoṣaṇakaṣāyakāḥ // (14.2)

वृद्धि vṛddhi *f*,
समान samāna *m*,
सर्व sarva *m*,
विपरीत viparīta *adj*,
विपर्यय viparyaya *m*,
रस rasa *mn*,
स्वादु svādu *m*,
अम्ल amla *n*,
लवण lavaṇa *n*,
तिक्त tikta *n*,
ऊषण ūṣaṇa *adj*,
कषायक kaṣāyaka *adj*,

षड् द्रव्यम् आश्रितास् ते च यथापूर्वं बलावहाः । (१५.१)
तत्राद्या मारुतं घ्नन्ति त्रयस् तिक्तादयः कफम् ॥ (१५.२)
ṣaḍ dravyam āśritās te ca yathāpūrvaṃ balāvahāḥ / (15.1)
tatrādyā mārutaṃ ghnanti trayas tiktādayaḥ kapham // (15.2)

षष् ṣaṣ *adj*,
द्रव्य dravya *n*,
आश्रि āśri *1.Ā.*,
तद् tad *m*,
च ca *m*,
बल bala *m*,
आवह āvaha *adj*,
तत्र tatra *ind*,
आद्य ādya *n*,
मारुत māruta *adj*,
हन् han *m*,
त्रि tri *m*,
तिक्त tikta *n*,
आदि ādi *m*,
कफ kapha *m*,

कषायतिक्तमधुराः पित्तम् अन्ये तु कुर्वते । (१६.१)
शमनं कोपनं स्वस्थहितं द्रव्यम् इति त्रिधा ॥ (१६.२)
kaṣāyatiktamadhurāḥ pittam anye tu kurvate / (16.1)
śamanaṃ kopanaṃ svasthahitaṃ dravyam iti tridhā // (16.2)

कषाय kaṣāya *m*,
तिक्त tikta *n*,
मधुर madhura *m*,
पित्त pitta *n*,
अन्य anya *pron*,
तु tu *m*,
कृ kṛ *n*,
शमन śamana *n*,
कोपन kopana *adj*,
स्वस्थ svastha *adj*,
हित hita *n*,
द्रव्य dravya *n*,
इति iti *m*,
त्रिधा tridhā *ind*,

उष्णशीतगुणोत्कर्षात् तत्र वीर्यं द्विधा स्मृतम् । (१७.१)
त्रिधा विपाको द्रव्यस्य स्वाद्वम्लकटुकात्मकः ॥ (१७.२)
uṣṇaśītaguṇotkarṣāt tatra vīryaṃ dvidhā smṛtam / (17.1)
tridhā vipāko dravyasya svādvamlakaṭukātmakaḥ // (17.2)

उष्ण uṣṇa *adj*,
शीत śīta *n*,
गुण guṇa *mn*,
उत्कर्ष utkarṣa *m*,
तत्र tatra *ind*,
वीर्य vīrya *m*,
द्विधा dvidhā *ind*,
स्मृ smṛ *m*,
त्रिधा tridhā *ind*,
विपाक vipāka *m*,
द्रव्य dravya *n*,
स्वादु svādu *m*,
अम्ल amla *n*,
कटुक kaṭuka *n*,
आत्मक ātmaka *adj*,

गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिराः । (१८.१)
गुणाः ससूक्ष्मविशदा विंशतिः सविपर्ययाः ॥ (१८.२)
gurumandahimasnigdhaślakṣṇasāndramṛdusthirāḥ / (18.1)
guṇāḥ sasūkṣmaviśadā viṃśatiḥ saviparyayāḥ // (18.2)

गुरु guru *n*,
मन्द manda *m*,
हिम hima *adj*,
स्निग्ध snigdha *n*,
श्लक्ष्ण ślakṣṇa *adj*,
सान्द्र sāndra *adj*,
मृदु mṛdu *n*,
स्थिर sthira *m*,
गुण guṇa *mn*,
ससूक्ष्म sasūkṣma *adj*,
विशद viśada *m*,
विंशति viṃśati *f*,
सविपर्यय saviparyaya *adj*,

कालार्थकर्मणां योगो हीनमिथ्यातिमात्रकः । (१९.१)
सम्यग्योगश्च च विज्ञेयो रोगारोग्यैककारणम् ॥ (१९.२)

kālārthakarmaṇāṃ yogo hīnamithyātimātrakaḥ / (19.1)
samyagyogaś ca vijñeyo rogārogyaikakāraṇam // (19.2)

काल kāla *adj*,
अर्थ artha *mn*,
कर्मन् karman *n*,
योग yoga
हा hā *f*,
मिथ्या mithyā *ind*,
अतिमात्रक atimātraka *adj*,
सम्यक् samyak *ind*,
योग yoga
च ca *m*,
विज्ञा vijñā *9.Ā.*,
रोग roga *mn*,
आरोग्य ārogya *n*,
एक eka *m*,
कारण kāraṇa *n*,

रोगस् तु दोषवैषम्यं दोषसाम्यम् अरोगता । (२०.१)
निजागन्तुविभागेन तत्र रोगा द्विधा स्मृताः ॥ (२०.२)
rogas tu doṣavaiṣamyaṃ doṣasāmyam arogatā / (20.1)
nijāgantuvibhāgena tatra rogā dvidhā smṛtāḥ // (20.2)

रोग roga *mn*,
तु tu *m*,
दोष doṣa *mn*,
वैषम्य vaiṣamya *n*,
दोष doṣa *mn*,
साम्य sāmya *adj*,
अरोग aroga *m*,
ता tā *f*,
निज nija *adj*,
आगन्तु āgantu *adj*,
विभाग vibhāga *m*,
तत्र tatra *ind*,
रोग roga *mn*,
द्विधा dvidhā *ind*,
स्मृ smṛ *m*,

तेषां कायमनोभेदाद् अधिष्ठानम् अपि द्विधा । (२१.१)
रजस् तमश् च मनसो द्वौ च दोषाव् उदाहृतौ ॥ (२१.२)
teṣāṃ kāyamanobhedād adhiṣṭhānam api dvidhā / (21.1)
rajas tamaś ca manaso dvau ca doṣāv udāhṛtau // (21.2)

तद् tad *m*,
काय kāya *m*,
मनस् manas *n*,
भेद bheda *m*,
अधिष्ठान adhiṣṭhāna *n*,
अपि api *m*,
द्विधा dvidhā *ind*,
रजस् rajas *n*,
तमस् tamas *m*,
च ca *m*,
मनस् manas *n*,
द्वि dvi *nr*,
च ca *m*,
दोष doṣa *mn*,
उदाहृ udāhṛ *2.P.*,

दर्शनस्पर्शनप्रश्नैः परीक्षेत च रोगिणम् । (२२.१)
रोगं निदानप्राग्रूपलक्षणोपशयाप्तिभिः ॥ (२२.२)
darśanasparśanapraśnaiḥ parīkṣeta ca rogiṇam / (22.1)
rogaṃ nidānaprāgrūpalakṣaṇopaśayāptibhiḥ // (22.2)

दर्शन darśana *adj*,
स्पर्शन sparśana *n*,
प्रश्न praśna *m*,
परीक्ष् parīkṣ *1.P.*,
च ca *m*,
रोगिन् rogin *adj*,
रोग roga *mn*,
निदान nidāna *n*,
प्राग्रूप prāgrūpa *n*,
लक्षण lakṣaṇa *n*,
उपशय upaśaya *m*,
आप्ति āpti *f*,

भूमिदेहप्रभेदेन देशम् आहुर् इह द्विधा । (२३.१)
जाङ्गलं वातभूयिष्ठम् अनूपं तु कफोल्बणम् ॥ (२३.२)
bhūmidehaprabhedena deśam āhur iha dvidhā / (23.1)
jāṅgalaṃ vātabhūyiṣṭham anūpaṃ tu kapholbaṇam // (23.2)

भूमि bhūmi *m*,
देह deha *mn*,
प्रभेद prabheda *m*,
देश deśa *m*,
अह् ah *1.P.*,
इह iha *ind*,
द्विधा dvidhā *ind*,
जाङ्गल jāṅgala *n*,
वात vāta *m*,
भूयिष्ठ bhūyiṣṭha *adj*,
अनूप anūpa *adj*,
तु tu *m*,
कफ kapha *m*,
उल्बण ulbaṇa *adj*,

साधारणं सममलं त्रिधा भूदेशम् आदिशेत् । (२४.१)
क्षणादिर् व्याध्यवस्था च कालो भेषजयोगकृत् ॥ (२४.२)
sādhāraṇaṃ samamalaṃ tridhā bhūdeśam ādiśet / (24.1)
kṣaṇādir vyādhyavasthā ca kālo bheṣajayogakṛt // (24.2)

साधारण sādhāraṇa *adj*,
सम sama *adj*,
मल mala *mn*,
त्रिधा tridhā *ind*,
भू bhū *f*,
देश deśa *m*,
आदिश् ādiś *6.Ā.*,
क्षण kṣaṇa *n*,
आदि ādi *m*,
व्याधि vyādhi *m*,
अवस्था avasthā *f*,
च ca *m*,
काल kāla *adj*,
भेषज bheṣaja *n*,
योग yoga
कृत् kṛt *1.P.*,

शोधनं शमनं चेति समासाद् औषधं द्विधा । (२५.१)
शरीरजानां दोषाणां क्रमेण परमौषधम् ॥ (२५.२)
śodhanaṃ śamanaṃ ceti samāsād auṣadhaṃ dvidhā / (25.1)
śarīrajānāṃ doṣāṇāṃ krameṇa paramauṣadham // (25.2)

शोधन śodhana *adj*,
शमन śamana *n*,
च ca *m*,
इति iti *m*,
समास samāsa *m*,
औषध auṣadha *adj*,
द्विधा dvidhā *ind*,
शरीर śarīra *n*,
ज ja *m*,
दोष doṣa *mn*,
परम parama *adj*,
औषध auṣadha *adj*,

वस्तिर् विरेको वमनं तथा तैलं घृतं मधु । (२६.१)
धीधैर्यात्मादिविज्ञानं मनोदोषौषधं परम् ॥ (२६.२)
vastir vireko vamanaṃ tathā tailaṃ ghṛtaṃ madhu / (26.1)
dhīdhairyātmādivijñānaṃ manodoṣauṣadhaṃ param // (26.2)

वस्ति vasti *mf*,
विरेक vireka *m*,
वमन vamana *adj*,
तथा tathā *ind*,
तैल taila *n*,
घृत ghṛta *n*,
मधु madhu *n*,
धी dhī *f*,
धैर्य dhairya *n*,
आत्मन् ātman *m*,
आदि ādi *m*,
विज्ञान vijñāna *n*,
मनस् manas *n*,
दोष doṣa *mn*,
औषध auṣadha *adj*,
पर para *pron*,

भिषग् द्रव्याण्य् उपस्थाता रोगी पादचतुष्टयम् । (२७.१)
चिकित्सितस्य निर्दिष्टं प्रत्येकं तच् चतुर्गुणम् ॥ (२७.२)
bhiṣag dravyāṇy upasthātā rogī pādacatuṣṭayam / (27.1)
cikitsitasya nirdiṣṭaṃ pratyekaṃ tac caturguṇam // (27.2)

भिषज् bhiṣaj *m*,
द्रव्य dravya *n*,
उपस्थातृ upasthātṛ *m*,
रोगिन् rogin *adj*,
पाद pāda *m*,
चिकित्सित cikitsita *n*,
निर्दिश् nirdiś *6.Ā.*,
प्रत्येक pratyeka *adj*,
तद् tad *m*,
चतुर्गुण caturguṇa *adj*,

चतुष्टय catuṣṭaya *fn*,

दक्षस् तीर्थात्तशास्त्रार्थो दृष्टकर्मा शुचिर् भिषक् । (२८.१)
बहुकल्पं बहुगुणं सम्पन्नं योग्यम् औषधम् ॥ (२८.२)
dakṣas tīrthāttaśāstrārtho dṛṣṭakarmā śucir bhiṣak / (28.1)
bahukalpaṃ bahuguṇaṃ sampannaṃ yogyam auṣadham // (28.2)

दक्ष dakṣa *adj*,
तीर्थ tīrtha *mn*,
आदा ādā *4.Ā.*,
शास्त्र śāstra *n*,
अर्थ artha *mn*,
दृष्टकर्मन् dṛṣṭakarman *adj*,
शुचि śuci *adj*,
भिषज् bhiṣaj *m*,
बहु bahu *n*,
कल्प kalpa *mn*,
बहु bahu *n*,
गुण guṇa *mn*,
सम्पन्न sampanna *n*,
योग्य yogya *adj*,
औषध auṣadha *adj*,

अनुरक्तः शुचिर् दक्षो बुद्धिमान् परिचारकः । (२९.१)
आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववान् अपि ॥ (२९.२)
anuraktaḥ śucir dakṣo buddhimān paricārakaḥ / (29.1)
āḍhyo rogī bhiṣagvaśyo jñāpakaḥ sattvavān api // (29.2)

अनुरञ्ज् anurañj *4.Ā.*,
शुचि śuci *adj*,
दक्ष dakṣa *adj*,
बुद्धिमन्त् buddhimant *adj*,
परिचारक paricāraka *m*,
आढ्य āḍhya *adj*,
रोगिन् rogin *adj*,
भिषज् bhiṣaj *m*,
वश्य vaśya *adj*,
ज्ञापक jñāpaka *adj*,
सत्त्ववन्त् sattvavant *adj*,
अपि api *m*,

सर्वौषधक्षमे देहे यूनः पुंसो जितात्मनः । (३०.१)
अमर्मगो ऽल्पहेत्वग्ररूपरूपो ऽनुपद्रवः ॥ (३०.२)
sarvauṣadhakṣame dehe yūnaḥ puṃso jitātmanaḥ / (30.1)
amarmago 'lpahetvagrarūparūpo 'nupadravaḥ // (30.2)

सर्व sarva *m*,
औषध auṣadha *adj*,
क्षम kṣama *n*,
देह deha *mn*,
युवन् yuvan *adj*,
अमर्मग amarmaga *adj*,
अल्प alpa *adj*,
हेतु hetu *m*,
अग्ररूप agrarūpa
रूप rūpa *n*,

पुंस् puṃs *m*,
जि ji *m*,
आत्मन् ātman *m*,
अनुपद्रव anupadrava *adj*,

अतुल्यदूष्यदेशर्तुप्रकृतिः पादसंपदि । (३१.१)
ग्रहेष्व् अनुगुणेष्व् एकदोषमार्गो नवः सुखः ॥ (३१.२)
atulyadūṣyadeśartuprakṛtiḥ pādasaṃpadi / (31.1)
graheṣv anuguṇeṣv ekadoṣamārgo navaḥ sukhaḥ // (31.2)

अतुल्य atulya *adj*,
दूष्य dūṣya *m*,
देश deśa *m*,
ऋतु ṛtu *m*,
प्रकृति prakṛti *f*,
पाद pāda *m*,
सम्पद् sampad *4.P.*,
ग्रह graha *adj*,
अनुगुण anuguṇa *adj*,
एक eka *m*,
दोष doṣa *mn*,
मार्ग mārga *m*,
नव nava *m*,
सुख sukha *adj*,

शस्त्रादिसाधनः कृच्छ्रः संकरे च ततो गदः । (३२.१)
शेषत्वाद् आयुषो याप्यः पथ्याभ्यासाद् विपर्यये ॥ (३२.२)
śastrādisādhanaḥ kṛcchraḥ saṃkare ca tato gadaḥ / (32.1)
śeṣatvād āyuṣo yāpyaḥ pathyābhyāsād viparyaye // (32.2)

शस्त्र śastra *n*,
आदि ādi *m*,
साधन sādhana *n*,
कृच्छ्र kṛcchra *adj*,
संकर saṃkara *m*,
च ca *m*,
ततस् tatas *ind*,
गद gada *n*,
शेष śeṣa *adj*,
त्व tva *n*,
आयुस् āyus *n*,
यापय् yāpay *10.P.*,
पथ्य pathya *adj*,
अभ्यास abhyāsa *m*,
विपर्यय viparyaya *m*,

अनुपक्रम एव स्यात् स्थितो ऽत्यन्तविपर्यये । (३३.१)
औत्सुक्यमोहारतिकृद् दृष्टरिष्टो ऽक्षनाशनः ॥ (३३.२)
anupakrama eva syāt sthito 'tyantaviparyaye / (33.1)
autsukyamohāratikṛd dṛṣṭariṣṭo 'kṣanāśanaḥ // (33.2)

अनुपक्रम anupakrama *adj*,
एव eva *m*,
अस् as *m*,
औत्सुक्य autsukya *n*,
मोह moha *m*,
अरति arati *adj*,

स्था sthā *f*,
अत्यन्त atyanta *adj*,
विपर्यय viparyaya *m*,
कृत् kṛt *1.P.*,
दृश् dṛś *4.Ā.*,
रिष्ट riṣṭa *adj*,
अक्ष akṣa *adj*,
नाशन nāśana *adj*,

त्यजेद् आर्तं भिषग्भूपैर् द्विष्टं तेषां द्विषं द्विषम् । (३४.१)
हीनोपकरणं व्यग्रम् अविधेयं गतायुषम् ॥ (३४.२)
tyajed ārtaṃ bhiṣagbhūpair dviṣṭaṃ teṣāṃ dviṣaṃ dviṣam / (34.1)
hīnopakaraṇaṃ vyagram avidheyaṃ gatāyuṣam // (34.2)

त्यज् tyaj *1.Ā.*,
आर्त ārta *adj*,
भिषज् bhiṣaj *m*,
भूप bhūpa *m*,
द्विष् dviṣ *6.Ā.*,
तद् tad *m*,
द्विष् dviṣ *6.Ā.*,
द्विष् dviṣ *6.Ā.*,
हा hā *f*,
उपकरण upakaraṇa *n*,
व्यग्र vyagra *adj*,
अविधेय avidheya *adj*,
गम् gam *m*,
आयुष āyuṣa *m*,

चण्डं शोकातुरं भीरुं कृतघ्नं वैद्यमानिनम् । (३५.१)
तन्त्रस्यास्य परं चातो वक्ष्यते ऽध्यायसंग्रहः ॥ (३५.२)
caṇḍaṃ śokāturaṃ bhīruṃ kṛtaghnaṃ vaidyamāninam / (35.1)
tantrasyāsya paraṃ cāto vakṣyate 'dhyāyasaṃgrahaḥ // (35.2)

चण्ड caṇḍa *m*,
शोक śoka *m*,
आतुर ātura *adj*,
भीरु bhīru *f*,
कृतघ्न kṛtaghna *adj*,
वैद्य vaidya *adj*,
मानिन् mānin *adj*,
तन्त्र tantra *n*,
इदम् idam *m*,
पर para *pron*,
च ca *m*,
अतस् atas *ind*,
वच् vac *2.P.*,
अध्याय adhyāya *m*,
संग्रह saṃgraha *m*,

आयुष्कामदिनर्त्वीहारोगानुत्पादनद्रवाः । (३६.१)
āyuṣkāmadinartvīhārogānutpādanadravāḥ / (36.1)

आयुष्काम āyuṣkāma *adj*,
दिन dina *mn*,

ऋतु ṛtu *m*,

ईहा īhā *f*,

रोग roga *mn*,

अनुत्पादन anutpādana *n*,

द्रव drava *mn*,

दोषादिज्ञानतद्भेदतच्चिकित्साद् व्युपक्रमाः । (३७.१)
शुद्ध्यादिस्नेहनस्वेदरेकास्थापननावनम् ॥ (३७.२)
doṣādijñānatadbhedataccikitsād vyupakramāḥ / (37.1)
śuddhyādisnehanasvedarekāsthāpananāvanam // (37.2)

व्युपक्रम vyupakrama *m*,

शुद्धि śuddhi *f*,

आदि ādi *m*,

स्नेहन snehana *adj*,

स्वेद sveda *m*,

रेक reka *m*,

आस्थापन āsthāpana *adj*,

नावन nāvana *n*,

धूमगण्डूषदृक्सेकतृप्तियन्त्रकशस्त्रकम् । (३८.१)
सिराविधिः शल्यविधिः शस्त्रक्षाराग्निकर्मिकौ ॥ (३८.२)
dhūmagaṇḍūṣadṛksekatṛptiyantrakaśastrakam / (38.1)
sirāvidhiḥ śalyavidhiḥ śastrakṣārāgnikarmikau // (38.2)

धूम dhūma *mn*,

गण्डूष gaṇḍūṣa *mn*,

दृश् dṛś *4.Ā.*,

सेक seka *m*,

तृप्ति tṛpti *f*,

यन्त्रक yantraka *m*,

शस्त्रक śastraka *n*,

सिरा sirā *f*,

विधि vidhi *m*,

शल्य śalya *m*,

विधि vidhi *m*,

शस्त्र śastra *n*,

क्षार kṣāra *n*,

अग्नि agni *m*,

कर्मिक karmika *adj*,

सूत्रस्थानम् इमे ऽध्यायास् त्रिंशच्छारीरम् उच्यते । (३९.१)
गर्भावक्रान्तितद्व्यापदङ्गमर्मविभागिकम् ॥ (३९.२)
sūtrasthānam ime 'dhyāyās triṃśacchārīram ucyate / (39.1)
garbhāvakrāntitadvyāpadaṅgamarmavibhāgikam // (39.2)

सूत्रस्थान sūtrasthāna *n*,

गर्भावक्रान्ति garbhāvakrānti *f*,

इदम् idam *m*,
अध्याय adhyāya *m*,
त्रिंशत् triṃśat *f*,
शारीर śārīra *adj*,
वच् vac *2.P.*,
तद् tad *m*,
व्यापद् vyāpad *4.Ā.*,
अङ्ग aṅga *adj*,
मर्मन् marman *n*,
विभागिक vibhāgika *adj*,

विकृतिर् दूतजं षष्ठं निदानं सार्वरोगिकम् । (४०.१)
ज्वरासृक्श्वासयक्ष्मादिमदाद्यर्शोऽतिसारिणाम् ॥ (४०.२)
vikṛtir dūtajaṃ ṣaṣṭhaṃ nidānaṃ sārvarogikam / (40.1)
jvarāsṛkśvāsayakṣmādimadādyarśo'tisāriṇām // (40.2)

विकृति vikṛti *f*,
दूत dūta *m*,
ज ja *m*,
षष्ठ ṣaṣṭha *adj*,
निदान nidāna *n*,
सार्वरोगिक sārvarogika *adj*,
ज्वर jvara *m*,
असृज् asṛj *n*,
श्वास śvāsa *m*,
यक्ष्मन् yakṣman *m*,
आदि ādi *m*,
मद mada *m*,
आदि ādi *m*,
अर्शस् arśas *mn*,
अतिसारिन् atisārin *adj*,

मूत्राघातप्रमेहाणां विद्रध्याद्युदरस्य च । (४१.१)
पाण्डुकुष्ठानिलार्तानां वातास्रस्य च षोडश ॥ (४१.२)
mūtrāghātapramehāṇāṃ vidradhyādyudarasya ca / (41.1)
pāṇḍukuṣṭhānilārtānāṃ vātāsrasya ca ṣoḍaśa // (41.2)

मूत्राघात mūtrāghāta *m*,
प्रमेह prameha *m*,
विद्रधि vidradhi *mf*,
आदि ādi *m*,
उदर udara *adj*,
च ca *m*,
पाण्डु pāṇḍu *adj*,
कुष्ठ kuṣṭha *m*,
अनिल anila *m*,
आर्त ārta *adj*,
वातास्र vātāsra *n*,
च ca *m*,
षोडशन् ṣoḍaśan *adj*,

चिकित्सितं ज्वरे रक्ते कासे श्वासे च यक्ष्मणि । (४२.१)
वमौ मदात्यये ऽर्शःसु विषि द्वौ द्वौ च मूत्रिते ॥ (४२.२)
cikitsitaṃ jvare rakte kāse śvāse ca yakṣmaṇi / (42.1)
vamau madātyaye 'rśaḥsu viṣi dvau dvau ca mūtrite // (42.2)

चिकित्सित cikitsita *n*,
ज्वर jvara *m*,
रक्त rakta *m*,
कास kāsa *m*,
श्वास śvāsa *m*,
च ca *m*,
यक्ष्मन् yakṣman *m*,
वमि vami *m*,
मदात्यय madātyaya *m*,
अर्शस् arśas *mn*,
विष् viṣ *4.P.*,
द्वि dvi *nr*,
द्वि dvi *nr*,
च ca *m*,
मूत्रित mūtrita *n*,

विद्रधौ गुल्मजठरपाण्डुशोफविसर्पिषु । (४३.१)
कुष्ठश्वित्रानिलव्याधिवातास्रेषु चिकित्सितम् ॥ (४३.२)
vidradhau gulmajaṭharapāṇḍuśophavisarpiṣu / (43.1)
kuṣṭhaśvitrānilavyādhivātāsreṣu cikitsitam // (43.2)

विद्रधि vidradhi *mf*,
गुल्म gulma *mn*,
जठर jaṭhara *adj*,
पाण्डु pāṇḍu *adj*,
शोफ śopha *m*,
विसर्पि visarpi *m*,
कुष्ठ kuṣṭha *m*,
श्वित्र śvitra *mn*,
अनिल anila *m*,
व्याधि vyādhi *m*,
वातास्र vātāsra *n*,
चिकित्सित cikitsita *n*,

द्वाविंशतिर् इमे ऽध्यायाः कल्पसिद्धिर् अतः परम् । (४४.१)
कल्पो वमेर् विरेकस्य तत्सिद्धिर् वस्तिकल्पना ॥ (४४.२)
dvāviṃśatir ime 'dhyāyāḥ kalpasiddhir ataḥ param / (44.1)
kalpo vamer virekasya tatsiddhir vastikalpanā // (44.2)

द्वाविंशति dvāviṃśati *f*,
इदम् idam *m*,
अध्याय adhyāya *m*,
कल्पसिद्धि kalpasiddhi *m*,
अतस् atas *ind*,
पर para *pron*,
कल्प kalpa *mn*,
वमि vami *m*,
विरेक vireka *m*,
तद् tad *m*,
सिद्धि siddhi *f*,
वस्ति vasti *mf*,
कल्पना kalpanā *f*,

सिद्धिर् वस्त्यापदां षष्ठो द्रव्यकल्पो ऽत उत्तरम् । (४५.१)
बालोपचारे तद्व्याधौ तद्ग्रहे द्वौ च भूतगे ॥ (४५.२)
siddhir vastyāpadāṃ ṣaṣṭho dravyakalpo 'ta uttaram / (45.1)
bālopacāre tadvyādhau tadgrahe dvau ca bhūtage // (45.2)

सिद्धि siddhi *f*,
वस्ति vasti *mf*,
आपद् āpad *4.Ā.*,
षष्ठ ṣaṣṭha *adj*,
द्रव्य dravya *n*,
कल्प kalpa *mn*,
अतस् atas *ind*,
उत्तर uttara *n*,
बाल bāla *n*,
उपचार upacāra *m*,
तद् tad *m*,
व्याधि vyādhi *m*,
तद् tad *m*,
ग्रह graha *adj*,
द्वि dvi *nr*,
च ca *m*,
भूत bhūta *mn*,
ग ga *m*,

उन्मादे ऽथ स्मृतिभ्रंशे द्वौ द्वौ वर्त्मसु संधिषु । (४६.१)
दृक्तमोलिङ्गनाशेषु त्रयो द्वौ द्वौ च सर्वगे ॥ (४६.२)
unmāde 'tha smṛtibhraṃśe dvau dvau vartmasu saṃdhiṣu / (46.1)
dṛktamoliṅganāśeṣu trayo dvau dvau ca sarvage // (46.2)

उन्माद unmāda *m*,
अथ atha *ind*,
द्वि dvi *nr*,
द्वि dvi *nr*,
वर्त्मन् vartman *n*,
संधि saṃdhi *mf*,
दृश् dṛś *4.Ā.*,
तमस् tamas *m*,
लिङ्गनाश liṅganāśa *m*,
त्रि tri *m*,
द्वि dvi *nr*,
द्वि dvi *nr*,
च ca *m*,
सर्वग sarvaga *adj*,

कर्णनासामुखशिरोव्रणे भङ्गे भगन्द्रे । (४७.१)
ग्रन्थ्यादौ क्षुद्ररोगेषु गुह्यरोगे पृथग् द्वयम् ॥ (४७.२)
karṇanāsāmukhaśirovraṇe bhaṅge bhagandare / (47.1)
granthyādau kṣudrarogeṣu guhyaroge pṛthag dvayam // (47.2)

कर्ण karṇa *adj*,
नासा nāsā *f*,
मुख mukha *adj*,
शिरस् śiras *n*,
व्रण vraṇa *mn*,
भङ्ग bhaṅga *adj*,
भगंदर bhagaṃdara *mn*,
ग्रन्थि granthi *n*,
आदि ādi *m*,
क्षुद्ररोग kṣudraroga *m*,
गुह्यरोग guhyaroga *m*,
पृथक् pṛthak *ind*,
द्वय dvaya *n*,

विषे भुजङ्गे कीटेषु मूषकेषु रसायने । (४८.१)
चत्वारिंशो ऽनपत्यानाम् अध्यायो बीजपोषणः ॥ (४८.२)

vise bhujaṅge kīṭeṣu mūṣakeṣu rasāyane / (48.1)
catvārimśo 'napatyānām adhyāyo bījapoṣaṇaḥ // (48.2)

विष viṣa *adj*,
भुजंग bhujaṃga *n*,
कीट kīṭa *m*,
मूषक mūṣaka *m*,
रसायन rasāyana *adj*,
चत्वारिंश catvāriṃśa *adj*,
अनपत्य anapatya *adj*,
अध्याय adhyāya *m*,
बीज bīja *mn*,
पोषण poṣaṇa *adj*,